अस्मिन् प्रश्नपत्रे **51** प्रश्नाः एवम् **8** मुद्रित पृष्ठाः सन्ति।

**अनुक्रमाङ्कः** | | | | | | | | | | | | |

**गूढसंख्या 71/S/245/A**

**स्तबकः** **A**

# VEDA ADHYAYAN

## वेदाध्ययनम्

## (245-S)

**परीक्षादिवसः दिनाङ्कश्च** ______________________

**निरीक्षकयोः हस्ताक्षरम्** 1. ______________________

2. ______________________

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

**सामान्या निर्देशाः**

1. सर्वेषां प्रश्नानामुत्तराणि दत्तोत्तरपुस्तके एव लिखन्तु।
2. प्रश्नपत्रिकां पठितुं **15** निमेशाः दत्ताः। प्रश्नपत्रिका **02.15** मध्यह्ने समये दीयते। **02.15** समयतः **02.30** समयपर्यन्तं प्रश्नपत्रिकामेव छात्राः पठेयुः, एतस्मिन् समये उत्तरपत्रिकायां न किमपि उत्तरं लिखेयुः।
3. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः।
4. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
5. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
6. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
7. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
8. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या **71/S/245/A,** स्तबक-**A** नूनं लेख्या।
9. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।



**UNNATI EDUCATION**
**9899-436-384: 9654-279-279**

# VEDA ADHYAYAN

# वेदाध्ययनम्

# (245-S)

**परीक्षासमयावधिः** (Time) – **होरात्रयम्** (3 Hrs.) **पूर्णाङ्काः** (Full Marks) – **100**

---

**निर्देशाः** (i) अस्मिन् प्रश्नपत्रे [A] भागे 20, [B] भागे 15, [C] भागे 6, [D] भागे 6, [E] भागे 4 इति आहत्य 51 प्रश्नाः सन्ति।

(ii) **सर्वे** प्रश्नाः **अनिवार्याः**।

(iii) प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति अङ्काः दीयन्ते।

(iv) [A] भागे प्र.सं. 1 तः 20 पर्यन्तं वस्तुनिष्ठ / बहुविकल्पप्रकारस्य प्रश्नाः (MCQs) येषु प्रत्येकं एकः अंकः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु।

(v) [B] भागे प्र.सं. 21 तः 35 पर्यन्तम् वस्तुनिष्ठप्रश्नाः/मेलनम्, रिक्तस्थानानि, सत्यम्–असत्यम्, इत्यादिः। प्रत्येक प्रश्नः अंकद्वयात्मकः अस्ति। ते यथानिर्देशं समाधेयाः।

(vi) [C] भागे प्र.सं. 36 तः 41 पर्यन्तम् अतिलघूत्तरीयाः प्रश्नाः प्रत्येकम् अंकद्वयात्मकाः सन्ति। ते यथानिर्देशं 30 तः 50 शब्दानां परिधिमध्ये समाधेयाः।

(vii) [D] भागे प्र.सं. 42 तः 47 पर्यन्तम् अनतिदीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् अंकत्रयात्मकाः सन्ति। ते यथानिर्देशं 50 तः 80 शब्दानां परिधिमध्ये समाधेयाः।

(viii) [E] भागे प्र.सं. 48 तः 51 पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् पञ्च अंकात्मकाः सन्ति। ते यथानिर्देशं 80 तः 100 शब्दानां परिधिमध्ये समाधेयाः।

(ix) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

(x) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या।

(xi) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।

(xii) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।

(xiii) निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।

(xiv) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।



UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR
UNNATI EDUCATION
9899-436-384: 9654-279-279

**[A]** विंशतिप्रश्नानां युक्तं विकल्पं चिनुत। **1×20=20**

**1** लिह् धातुना किम् सिध्यति ? **1**

(क) रिह् (ख) रिहाणे

(ग) रुह् (घ) लिहाण्

**2** जुङ् धातोः किम् निष्पद्यते ? **1**

(क) जव् (ख) जुव्

(ग) जवेते (घ) जेव्

**3** कस्य सूक्तस्य प्रथममन्त्रस्य अग्निः देवता अस्ति ? **1**

(क) संज्ञान (ख) सूर्यः

(ग) उषा (घ) पूषा

**4** A New Approach to the vedas इति पुस्तकं केन लिखितम् ? **1**

(क) श्रीमदानन्द कुमारः (ख) महर्षि अरविन्दः

(ग) स्वामी दयानन्दः (घ) सायणाचार्यः

**5** वरुण – देवमुपाम्य कः पुत्रं लब्धवान् ? **1**

(क) विश्वामित्रः (ख) इन्द्रः

(ग) हरिश्चन्द्रः (घ) अजीगर्तः

**6** ऋग्वेदस्य दशमं मण्डलं केन सुक्तेन सम्बन्धितम् अस्ति ? **1**

(क) वरुण सूक्तेन (ख) संज्ञान सूक्तेन

(ग) उषस् सूक्तेन (घ) सोम सूक्तेन

**7** आ रिख किकिरा – इति मन्त्रः कस्माद् सूक्ताद् ? **1**

(क) उषा (ख) पूषन्

(ग) सूर्यः (घ) संज्ञान

**8** प्रकाशिका कस्य शब्दस्यार्थः अस्ति ? **1**

(क) उत्थायिका (ख) उषा

(ग) वैदिका (घ) ऋषिका



UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR
**UNNATI EDUCATION**
**9899-436-384: 9654-279-279**

9 अथेमस्मभ्यं रन्धय इत्यत्र रन्धय पदस्यार्थः ? 1

(क) दुर्बलम् (ख) वशीकुरु
(ग) प्रतोद (घ) परितृन्धि

10 यज्ञ शब्दस्य कति अर्थाः ? 1

(क) त्रयः (ख) चत्वारः
(ग) पञ्चः (घ) षट्

11 वामदेवः कस्य सूक्तस्य ऋषिः अस्ति ? 1

(क) वरुणः (ख) अग्निः
(ग) सूर्यः (घ) उषा

12 प्रसादभक्षणम् इति कस्य अर्थः अस्ति ? 1

(क) ओषधि सेवनम् (ख) आहुतिदानम्
(ग) ईडाभक्षणम् (घ) भोजनम्

13 तस्मा इन्द्रः स्तूयमानः – इति कुतः संकलितः ? 1

(क) इन्द्रसूक्ताद् (ख) विश्वामित्र–नदी संवादात्
(ग) शुनः शेपोपाख्यानाद् (घ) सूर्य सूक्ताद्

14 दैवत काण्डः कस्मिन् ग्रन्थे उपलभ्यते ? 1

(क) निरुक्ते (ख) महाभाष्ये
(ग) वेदे (घ) शतपथ ब्राह्मणग्रन्थे

15 शुनः शेपः कस्य अङ्के उपविशति ? 1

(क) रोहितस्य (ख) विश्वामित्रस्य
(ग) अजीगर्तस्य (घ) हरिश्चन्द्रस्य

16 नैतिक जगतः नियामकः (नैतिकाध्यक्षः) कः देवः ? 1

(क) इन्द्रः (ख) अग्निः
(ग) वरुणः (घ) विष्णुः

17 नुडागमः केनन सूत्रेण भवति ? 1

(क) नित्यं छन्दसि (ख) विभाषा छन्दसि
(ग) नाद्धस्य (घ) ये यज्ञकर्मणि



UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR
UNNATI EDUCATION
9899-436-384: 9654-279-279

18 अजीगर्तस्य पुत्रः कः न ? 1

(क) शुनः पुच्छः (ख) शुनःशेपः

(ग) शुनोलाङ्गुलम् (घ) शुनःशयम्

19 संज्ञान सूक्तस्य द्वितीयमन्त्रस्य देवता अस्ति ? 1

(क) उषा (ख) संज्ञान

(ग) अग्निः (घ) सूर्यः

20 अजीगर्तः मध्यमम् पुत्रं कस्मै ददाति ? 1

(क) देवाय (ख) वरुणाय

(ग) वशिष्ठाय (घ) रोहिताय

**[B]** पञ्चदशप्रश्नानां **(21-35)** यथानिर्देशम् उत्तराणि लिखत। **2×15=30**

21 सत्यम् अथवा असत्यं विकल्पं चिनोतु। 2

(क) पूर्वं तु भाषायाम् अनेन प्लुतत्वं विधीयते। (सत्यम्/असत्यम्)

(ख) णत्वेन सम्बन्धितः अग्नीत्प्रेषणे परस्य च सूत्रः वर्तते। (सत्यम्/असत्यम्)

22 सत्यम् अथवा असत्यं विकल्पं चिनोतु। 2

(क) अमु प्रत्ययो अमु च छन्दसि अनेन न भवति। (सत्यम्/असत्यम्)

(ख) बहुप्रजाः शब्दस्य प्रयोगः लोके तथा बहुप्रजः शब्दस्य प्रयोगः वेदे भवति। (सत्यम्/असत्यम्)

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

23 सत्यम् अथवा असत्यं विकल्पं चिनोतु। 2

(क) सोमः अस्यामस्ति इति विग्रहे–सोमावती इति पदं मन्त्रे भवति। (सत्यम्/असत्यम्)

(ख) सुञि परतः इकः दीर्घो ऋग्वेदे भवति। (सत्यम्/असत्यम्)

24 सत्यम् अथवा असत्यं विकल्पं चिनोतु। 2

(क) निपातस्य अनेन सूत्रेण प्लुतः भवति। (सत्यम्/असत्यम्)

(ख) लोके ऋभुक्षणम्/ऋभुक्षाणम् पद द्वयम् साधु। (सत्यम्/असत्यम्)

25 सत्यम् अथवा असत्यं विकल्पं चिनोतु। 2

(क) छन्दसि अवर्णान्ताद् अङ्गात् परस्य जसेः असुगागमो भवति। (सत्यम्/असत्यम्)

(ख) आमः नुट् आगमो छन्दसि श्रीग्रामण्योः अनेन न भवति। (सत्यम्/असत्यम्)



**UNNATI EDUCATION**
**9899-436-384: 9654-279-279**

**26** सत्यम् अथवा असत्यं विकल्पं चिनोतु। **2**

(क) प्रसमुपोदः पादपूरणे अस्मिन् सूत्रे त्रयः उपसर्गाः सन्ति। (सत्यम्/असत्यम्)

(ख) दूवर्णान्ताद् रेफान्ताच्च परस्य मतोर्मस्य वः स्यात्। (सत्यम्/असत्यम्)

**27** रिक्तस्थानं पूरयत। **2**

(1) ________ छन्दस्यमाङ् योगे अपि।

(2) ________ कृवृभ्यः छन्दसि।

**28** एकपदेन उत्तरत – **2**

(1) ओमभ्यादाने इत्यत्र अभ्यादानस्य को अर्थः ?

(2) यज्ञकर्मणि ये पदम् भवति ?

**29** उचितं मेलयत – **2**

| | | | |
|---|---|---|---|
| (1) | सहस्य सध–आदेशः स्यात् | (क) | पितरामातरा |
| (2) | छन्दसि निपात्यते ? | (ख) | सधस्थः/सधस्थम् |

**30** एकपदेन उत्तरत– **2**

(1) स्य इत्यस्य सोर्लोपः कदा भवति ?

(2) आज्जसेरसुक् अनेन कः आगमो भवति ?

UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR

**31** अधोलिखितसूत्राणाम् उचित प्रकरणेन मेलनं कुरुत– **2**

| | | | |
|---|---|---|---|
| (1) | तुजादीनां दीर्घोऽभ्यासस्य | (क) | तूतुजानः |
| (2) | खिदेश्छन्दसि | (ख) | चिखाद/चिखिदे |

**32** उचितं मेलयत – **2**

| | | | |
|---|---|---|---|
| (1) | भुवस् इति महाव्याहृतेः सकारस्य रेफो भवति | (क) | भुवरिति |
| (2) | भुवस् इति महाव्याहृतेः सकारस्य रुत्वं न भवति | (ख) | भुव इति |

**33** उचितस्य मेलनं कुरुत – **2**

| | | | |
|---|---|---|---|
| (1) | प्रमिणन्ति | (क) | ससुवेति निगमे |
| (2) | ससूव | (ख) | मीनातेर्निगमे |



UNNATI EDUCATION
9899-436-384: 9654-279-279

34 उचितस्य मेलनम् कुरुत – 2

| | | | |
|---|---|---|---|
| (1) | कर्णवन्तः | (क) | अनो नुट् |
| (2) | सुपथिन्तरः | (ख) | नाद् घस्य |

35 उचितं मेलयत – 2

| | | | |
|---|---|---|---|
| (1) | अण् | (क) | अश्विमानण् |
| (2) | ङीष् | (ख) | नित्यं छन्दसि |

[C] षण्णां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत। 2×6=12

36 पूषन् सूक्तस्य देवता–छन्दश्च लिखत। 2

**अथवा**

संज्ञान सूक्तस्य देवतां – छन्दश्च लिखत।

37 शुनः शेपोपाख्याने प्रथम द्वितीयभागे कयोः मध्ये सम्वादः भवति ? 2

**अथवा**

विश्वामित्रः शुनः शेपाय कति गाथाः उपादिशत् ? रोहिताय चरैवेति कः उपदिष्टवान् ?

38 मीमांसकानां मते वेदानां स्वरुपं किम् ? 2

**अथवा**

ऋषिः शब्दस्य को अर्थ ?

39 वेदस्य यज्ञपरकीय व्याख्या केन कृता ? 2

**अथवा**

आध्यात्मिक व्याख्या केन–केन आचार्येण कृता ?

40 श्रुशृणुपृकृवृभ्यश्छन्दसि इति सूत्रस्यार्थ लिखत। 2

41 धिष्व इत्यत्र धा धातोः इत्वं केन सूत्रेण निपात्यते ? 2



UNNATI EDUCATIONS EK KADAM UNNATI KI AUR

UNNATI EDUCATION
9899-436-384: 9654-279-279

**[D]** षट् अनतिदीर्घोत्तरैः समाधत्त। **3×6=18**

**42** पुषन् सूक्तं वर्णयत। **3**

**अथवा**

उपस्सूक्तं वर्णयत।

**43** इन्द्रस्य माहात्म्यं वर्णयत। **3**

**44** विश्वामित्र–नदी संवादस्य सारं लिखत। **3**

**45** अथ ह शुनः शेपो विश्वामित्रस्य.. इति मन्त्रस्य अथवा तस्य ह विश्वामित्रस्यैकशतं इति मन्त्रस्य भावार्थः लेखनीयः, स्वभाषया सप्रसङ्गं व्याख्यायत। **3**

**46** ओमभ्यादाने सूत्रं सोदाहरणं व्याख्यायत। **3**

**47** इकः सूञि सूत्रं सोदाहरणं व्याख्यायत। **3**

**[E]** चत्वारः प्रश्नाः दीर्घोत्तरैः समाधेयाः। **4×5=20**

**48** वेदाः नित्याः **अथवा** अनित्याः विमर्शयत। **5**

**49** सूर्यस्वरुपं **अथवा** संज्ञानसूक्तं स्पष्टयत। **5**

**50** सध मादस्थयोश्छन्दसि सूत्रं यथाग्रन्थं व्याख्यायत। **5**

**51** जनिता मन्त्रे सूत्रं सोदाहरणं व्याख्यायत। **5**



UNNATI EDUCATIONS
EK KADAM UNNATI KI AUR
UNNATI EDUCATION
9899-436-384: 9654-279-279